This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M650 विषय पूजाविधी

नाव. लिंगतोभद्र सर्वतोभद्र कारिका

लेखक/लिपीकार — MSS

पृष्ठ 11 काळ — पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥लिंगतोभद्रसर्वतोभद्रकारिका॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ॥श्रीगणेशायनमः॥ ॥मंडलेयन्नलिंगानांउसत्तिःषोडशास्मृता॥तदहंसंप्रवक्ष्या
मिसर्वपापविमुक्तये॥१॥चतुर्विंशतिरेखास्युस्तिर्यगूर्ध्वगताःशुभाः॥कोणकेको
ष्टस्त्रिभिर्श्चंद्रःषडैकादशास्मृखला॥२॥वल्लीकोष्टस्त्रिविंशत्यापड्भिःकोष्टैश्चभद्र
कं॥कोष्टैर्वाप्यस्त्रयोदशारुद्रोष्टादशाकोष्टकैः॥३॥पार्श्वेपार्श्वेचवापीनांचतुष्कंसं
प्रकाति॥पार्श्वेपार्श्वेचरुद्राणांत्ततीयंपरिकीर्तितं॥४॥भद्रद्वयंचतुःपार्श्वेरु
द्राणामूर्द्धकोष्टकाः॥एकोनविंशतिस्तिर्यक्पीतरक्तैःप्रपूरयेत्॥५॥वल्योःस
कारोभद्रेद्वेषड्भिःकोष्टैःअपूर्ववत्॥मध्येरुद्रंप्रकुर्वीततथाशालाकोष्टकैः॥६॥
रुद्रपार्श्वेद्वयेकार्यावापिकोष्टाष्टसंमिता॥वापिद्वयंचतुःपार्श्वेश्चेतान्नैश्चप्रपूरयेत्॥७॥

एवंषोडशरुद्राश्चचतुर्विंशतिवापिकाः॥द्विपंचाशन्मितैःकोष्टैःपरिधिःपीतपूरितं॥८॥
अष्टंमध्यप्रकर्तव्यंपंचविंशतिकोष्टकैः॥अष्टदलंतथारक्तंकिंचिन्द्धेतंप्रकल्पयेत्॥९॥
श्वेतंशालाकृष्णधान्यैस्तवल्लीनीलैप्रपूरयेत्॥भद्रंतुरक्तधान्येनवापिश्चेतान्नपूरिता॥१०॥
तथरुद्राश्चकृष्णान्नैपीतैस्तुपरिधिद्वयं॥सत्वंरजस्तमइतिरेखात्रितयमालिखेत्॥११॥
मंडलंसर्वपापघ्नलिंगषोडशसंमितं॥शैववृतेषुसर्वेषुतथागुरुतपोभिधे॥१२॥ ॥इति
षोडशलिंगतोभद्रमंडलं॥सप्तविंशतिरेखाश्चतिर्यगूर्ध्वाःप्रकल्पयेत्॥परैस्त्रिभिश्च
कोणेदुःश्वंखलावेदसंमिता॥१॥नाल्लिनागमिताप्रोक्ताभद्रंपंचदशात्मकं॥भद्रपार्श्वे
तपरुद्रःषड्विंशतिपदैर्भवेत्॥२॥सत्काचैकंपदंतद्वद्रुद्रंकुर्याच्चपूर्ववत्॥पद्मेकंतथा
सलत्ततीयंरुद्रमालिखेत्॥३॥ईशभद्रांतरेलेषुपीतकोष्टंचतुष्टयं॥त्रयोदशापदवापी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिमध्ये प्रकल्पयेत्॥४॥वल्ली शिरसि येकोणे कोष्ठाः षोडश संस्थिताः॥शिवसंधांत
रालेषु द्वाकोष्ठाः प्रकीर्तिताः॥५॥पीतान्नैः पूरिता कार्या त्रियोदशपदात्मिका॥शिवां
तरा युग्या वाप्यः श्वेतान्नेन प्रपूरयेत्॥६॥शिवोपरि प्रकुर्वीत रेखात्रितयमुन्नतं॥कस्मा
रक्तं त्यांश्चैता शिव विष्णु विरिंचिकाः॥७॥मध्ये तु मंडलं कार्यं सर्वतोभद्रसंज्ञकं॥एवं
हरिहरं प्रोक्तं मंडलं पापनाशनं॥८॥शृंखलाश्चैव रुद्राश्च कस्मान्नेन प्रपूरयेत्॥भद्रा
णि कधान्यैश्च परिधिं पीतवर्णकैः॥९॥तथैव पूरयेदन्नैः सर्वतोभद्रमंडलं॥इति ह
रिहर मंडलं॥॥सप्तविंशति रेखाभिर्गौरितिलकमंडलं॥इंदुः स्त्रिभिः पदैः कार्यः शृंख
लास्तप्रकोष्ठकैः॥१॥पंचदशपदा वल्ली भद्रं दशपदात्मकं॥पार्श्वे तु षट् पदं भद्रं रक्तान्ने
न प्रपूरयेत्॥२॥ज्येष्ठभद्रसमीपे तु रुद्रं द्वादशकोष्ठकं॥मध्ये तु दशपदा वापी श्वेतान्ने

२

न प्रपूरयेत्॥३॥भद्रं रुद्रान्तराले तु कोष्ठाः श्वेतान्नपूरिताः॥वाप्यामुपरि रुद्रं तु तृ
तीयं भद्रमेव च॥४॥पदषट्कं तथा रक्तं तिर्यक्कुर्यात् शिवोपरि॥षड्विंशत्सहितापीता
परिधिः परिकल्पयेत्॥५॥तथोपरि प्रकुर्वीत शिवं त्रिंशतिकोष्ठकं॥षड्विंशति
पदाः कोषाः श्वेतान्नेन प्रपूरयेत्॥६॥शृंखला मध्य रुद्रं च कस्मान्नेन प्रपूरयेत्॥
कोषाद्वादशरुद्राश्च पीताः कार्याः प्रयत्नतः॥७॥वल्ली नीला प्रकर्त्तव्या भद्राण्या
रक्तकानि च॥कोषं तु श्वेतधान्येन पूरयेच्च प्रयत्नतः॥८॥नयारेखा नयंतद्गौ
री तिलकमंडलं॥इति गौरीतिलकं॥॥रेखा एकादश प्रोक्ता मंडलं पंचभद्रके॥खंडे
दु स्त्रिपदैर्वल्ली त्रिपदा परिकीर्त्तिता॥१॥त्रिपदा शृंखला चैव वल्ली मध्ये पदद्वयं॥

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पीतं कुर्यात्प्रयत्नेन भद्रं पद्मचतुष्टयं ॥१॥ भद्रं परितथापार्श्वे कुर्यात्पीतं पदद्वयं ॥ म
ध्ये चतुष्पदं रक्तं भद्रं पापं व्रणाशनं ॥ रेखात्रितयसंयुक्तं यच्चीर्णं व्रतसिद्धये ॥२॥
इति पंचभद्रासनं ॥ ॥ त्रिचत्वारिंशति ४३ रेखाः प्रागुदीच्यां करोत्सुधः ॥ खंडेंदु
स्त्रिपदाकोणे शृंखलासप्तभिः पदैः ॥१॥ पंचदशापदावल्ली भद्रं तु नवभिः पदैः ॥
कुर्याल्लिंगात्तरे वापी चतुर्विंशतिभिः पदैः ॥२॥ लिंगं स्यात्तत्र ईशास्यषष्टाविंशति
भिः पदैः ॥ लिंगस्य पार्श्वतो वापी वाप्यां लिंगं ततः परं ॥३॥ एवं वाप्यश्चतस्त्रः सु
लिंगानां मध्यतस्त्रिकं ॥ मध्ये स्यात्सर्वतोभद्रं सत्वं रजतमोवृतं ॥४॥ शृंखला पि
गला वापीमूर्ध्वं पीतेन पूरयेत् ॥ वापीपीतांतराले तु रक्तवर्णेन पूरयेत् ॥५॥ एवं हद्द

३

शाभिर्लिंगैः स्याद्हरिहरमंडलं ॥६॥ निद्धारश्वा लिंगतोभद्रं हरिहरमंडलं ॥ ॥ चतु
र्विंशतिरालेख्या रेखाः प्राग्दक्षिणायताः ॥ कोणेषु शृंखलाः पंचपदावल्यश्च
पार्श्वतः ॥ पदैर्नवभिरालेख्याचतुर्भिर्लघुशृंखलाः ॥१॥ लघुवल्यः पदैः षड्भिः
ततोष्टादशाभिः पदैः ॥ कृत्वा लिंगानि वाप्यस्तु त्रयोदशाभिरंतरा ॥२॥ ततो वापी
द्वयेनैव पीठं कुर्याद्विचक्षणः ॥ तस्य पादाः पंचपदाद्वाराण्यपि तथैव च ॥३॥ एका
गीतिपदं मध्ये पद्मस्वस्तिकमिष्यते ॥ कोणेषु शृंखलाकार्याः पदैस्त्रिभिरतः परं
॥४॥ पदैश्चतुर्भिर्दिक्षु स्युः भद्राण्येषां समंततः ॥ एकादशापदावल्यो मध्येष्टदल
मालिखेत् ॥५॥ पद्मं नवपदं ह्येवं लिंगतोभद्रमिष्यते ॥ शृंखलाः कृष्णवर्णेन वल्ली

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलेनपूरयेत्॥६॥रक्तेनशृंखलावल्लीर्वल्लीपीतेनपूरयेत्॥लिंगानिकृष्णवर्णा
निश्वेतेवाप्यथवापिका:॥७॥पीठंसपादंश्वेतेनपीतेनद्वारपूरणं॥मध्येस्तु:शृं
खलारक्तावल्लीनीलेनपूरयेत्॥८॥भद्राणिपीतवर्णानिपीताष्टंकजकर्णिका
॥दलानिश्वेतवर्णानियद्वाचित्राणिकल्पयेत्॥९॥तिस्रोरेखाबहि:कार्या:
सितरक्ता:सिता:क्रमात्॥इतिअष्टलिंगतोभद्रमंडलं॥॥कारयेत्सर्वतोभद्रं
वेदिकोपरिसुंदरं॥तिर्यगूर्ध्वगतारेखा:कुर्यादेकोनविंशति॥खंडेंदुस्त्रिपदा
कोणेशृंखलापंचकोष्टका॥एकादशापदावल्लीभद्रंतुनवभि:पदै:॥चतुर्विंशस
दावापीपरिधिर्विंशतिंपदै:॥मध्येषोडशाभि:कोष्टै:पद्ममष्टदलंस्मृतं॥सितेंदु:

४

शृंखलाकृष्णावल्लीनीलेनपूरयेत्॥भद्राकृष्णासिताबाप्य:परिधि:पीतवर्णक:॥
शुक्लुवायद्विवारक्तंपद्मंकार्यंसुशोभितं॥बाह्येंतरदलाश्वेताकर्णिकापीतवर्णका
॥खंडेंदु:शृंखलावल्लीवापीभद्रंतुपंचमं॥परिध्यावेष्टितंपद्मबाह्येसत्वरजस्त
या॥सर्वव्रतेसमुद्दिष्टंसर्वतोभद्रमंडलं॥कारयेत्सप्तधान्यैर्वाबर्णकैरुपशोभि
तं॥७॥चतुर्हस्तप्रमाणंतुपताकातोरणान्वितं॥एवंविधंचसंपूज्यगंधपुष्पो
पहारकै:॥८॥इतिसर्वतोभद्रमंडलं॥॥प्रकारांतरमाह॥प्रागुदीच्यागतारे
खाश्चतुर्दशापृथक्क्रमा:॥नवषट्चंद्रसंख्याका:कोष्ठा:स्युस्तासुसंख्य
या॥९॥त्रिभि:पदैस्तुखंडेंदु:शृंखलात्रिभिरीरिता॥वल्लीतुसप्तभि:प्रोक्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भद्रंतुचतुर्भिः पदैः॥२॥अष्टाभिर्दीर्घिकाप्रोक्ताभद्रयोर्मध्यतःक्रमात्॥पदैःषोड
शभिःप्रोक्तःपरिधिर्मध्यतोबुधैः॥३॥पद्ममष्टदलंप्रोक्तमेकेनमध्यमीरितं॥
श्वेतकृष्णहरिद्रक्तैःशुभ्रपीतैर्गुणैःक्रमात्॥४॥पूरयेत्तुतथापद्मंमिलितैःस्वैः
स्वयुक्तितः॥श्वेतेनरजसामध्यंवह्निर्द्वयोयथाक्रमं॥५॥सत्वंरजस्तमोभि
स्तुसर्वतोभद्रमुत्तमं॥सर्वकर्मसुविज्ञेयमेतत्साधारणंबुधैः॥६॥इतिस
र्वतोभद्रमंडलं॥॥प्रकारांतरंगौरीतिलकं॥एकोन्नत्वमेवतल्लिंगं॥आग्नेये
॥तिर्यगूर्ध्वगतारेखाःकार्यास्त्रिंशधास्त्वयोदश॥कोणेदुस्त्रिपदःकार्यःशृंख
लात्रिपदासिता॥वल्लीचषट्पदानीलाभद्रंरक्तंप्रकल्पयेत्॥पदैर्द्वादशभिः



स्यथंउत्तरेपूर्वदक्षिणे॥पश्चिमायांमहाभद्रंअष्टाविंशतिकोष्टकं॥लिंगपा
र्श्वेतथामूर्द्धिअष्टौकोष्टास्तुपीतकाः॥३॥लिंगमेकंतथागौर्यस्त्रिस्त्रस्तुरन्
मंडलं॥पूजयेन्मंडलंचैतत्तस्यगौरीप्रसीदति॥४॥एकोन्नत्वमेनल्लिंगं॥ ॥
प्रकारांतरासर्वतोभद्रं॥रेखाविंशतिसंयुक्ताभीमरथ्यासुमंडलं॥सूर्यव्र
तेषुसर्वेषुशस्यतेमंडलंत्विदं॥१॥खंडेंदुःस्त्रिपदःकार्योशृंखलाषट्पदाम
ता॥त्रयोदशपदैर्वल्लीभद्रंतुत्रिपदंमतं॥२॥सूर्यत्रयंप्रकुर्वीतसप्तविंशति
भिःपदैः॥सूर्यत्रयेचतुःकोणेपदमर्द्धंलिख्येत्॥पदैस्तुनवभिःकृत्वाभवेत्सू
र्यत्रयंबुधः॥सूर्योपरिभवेभद्रंपदद्वादशभासंमितं॥४॥उर्ध्वमिदंप्रकुर्वीतच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्भिस्तु सितैः पदैः॥ परिधिः षोडशापदेष पभद्रं नवपदंततः॥ सत्वं रजस्तमइति
रेखास्तु मंडलाद्बहिः॥ कृष्णाचश्रृंखलाद्येयावल्ली नीलाप्रकीर्त्तिता॥६॥ भद्र
पीतान्प्रकुर्वीतरथीन्रक्तान्प्रकारयेत्॥ पीतश्चपरिधिः प्रोक्तोपभ्रंरक्तंतथैव
च॥७॥ इति सूर्यव्रतमंडलं॥ ॥अथचतुर्लिंगोद्भवं॥ प्रागुदीच्यागतारेखाकु
र्यात्त्रिसप्तविंशतिः॥ खंडेंदुस्त्रिपदः कोणेशृंखलानवभिः पदैः॥ वल्लीएकोन
विंशास्याच्चतुर्विंशतिभिः वापिका॥ मध्येषोडशभिः कोष्टैः पद्ममष्टदलस्मृतं
॥१॥ चतुर्लिंगोद्भवंश्रीवंमंडलंव्रतसिद्धिदं॥ इति॥ ॥रेखात्रयोदशाकार्याचि
तुर्लिंगसमुद्भवे॥ कोणेंदुस्त्रिपदः श्वेतः शृंखला त्रिपदा सिता॥ वल्लीस

६

तपदानीलाभद्रंरक्तंचतुःपदं॥ भद्रपार्श्वेमहारुद्रं कृष्णमष्टादशैः पदैः॥ २॥ शि
वस्य पार्श्वयोर्वापीकुर्यात्संख्यपदासिता॥ पदमेकंतथापीतंभद्रवाप्योस्तुम
ध्यतः॥३॥ शिरसिशृंखलायाश्चकुर्यात्सीतपदत्रयं॥ शिवानांस्कंदयोः को
ष्टाविंशास्योरक्तवर्णका॥४॥ पदैस्तुनवभिः पश्चात्कमलंवाष्टपत्रकं॥ रेखा
त्रयं प्रकुर्वीतचतुर्लिंगसमुद्भवं॥५॥ इतिमकारांतरं॥ ॥प्रागुदीच्यागतारे
खाकुर्याद्द्वाविंशतिस्तथा॥ खंडेंदुस्त्रिपदः कोणेषट्पदाचैवशृंखला॥ त्रयो
दशापदावल्लीचतुर्भिर्भद्रमेव च॥ कृष्णधान्येनरुद्रःस्याल्लिंगस्याष्टभिःपदैः
॥१॥ उभयोर्लिंगयोर्मध्येवाप्येकादशाभिःपदैः॥ उपयोर्लिंगयोर्मध्येवाप्येका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्राभिः पदैः ॥ तृतीयं ताद्दशं लिंगं वाप्यूर्ध्वमष्टभिः पदैः ॥ पदानि परिशेषाणि सि
तान्नेन प्रपूरयेत् ॥ परिधिश्चतुर्विंशत्या परिधिस्तु मध्यतः ॥ तन्मध्यः परिधिः
प्रीतो पदानि तस्य षोडश ॥ कमलं अष्टपत्रं स्यात्तन्मध्ये नवभिः पदैः ॥ ५ ॥ मं
डलं द्वादशं लिंगं लतालिंगोद्भवं त्विदं ॥ शिवव्रते समादिष्टं सर्वसिद्धिकरं
त्विदं ॥ ६ ॥ इति लतालिंगोद्भवमंडलं ॥ ॥ द्वितीयं मंडलं वक्ष्ये लिंगद्वादशसंभ
वं ॥ तिर्यगूर्ध्वगता रेखा कार्या स्त्रिंशति पंच च ॥ कोणेंदु स्त्रिपदो वल्ली सप्तवि
शतिभिः पदैः ॥ त्रयोदशपदैः कार्याः शृंखला कृष्णवर्णिका ॥ भद्रं नवपदं रक्तं
वापी द्वादशाभिः पदैः ॥ भद्रवाप्योः समीपे च लघु द्वादशपदैः शिवः ॥ विहायैकपदं

८

था

रुद्राक्षद्वयं षड्भिः पदैः सितं ॥ भद्रादेकं पदं त्यक्त्वा पश्चाद्रुद्रं तु विधं ॥ ७ ॥ भद्रयोश्च
तथा वाप्योर्मध्ये द्वादशकोष्ठकं ॥ पूरयेद्रक्तधान्येन यथा जायेत कोकिला ॥
॥ ५ ॥ शिवयोः स्कंधदेशाच्च त्यक्त्वा पदद्वयं तथा ॥ रुद्रमष्टादशापदैः कुर्याच्च
कृष्णधान्यतः ॥ एकद्वादशके वाप्यौ कुर्याद्रुद्रस्य पार्श्वयोः ॥ अर्द्धेंदुमानयोः
स्कंधे पदमेकं शिवं यजेत् ॥ पीतं पदचतुष्कं च पूजयेच्छशांके ॥ मध्ये षोडशपादे
तु कमलं चाष्टपत्रकं ॥ ८ ॥ चतुःपार्श्वे भवेत्सेवं चतुर्विंशतिवापिका ॥ त्यक्त्वा निवा
ष्टभद्राणि कोकिलानां चतुष्टयं ॥ श्वेतानि चाष्टपत्राणि रेखा त्रितयमुन्नतं ॥
एवं तु मंडलं प्रोक्तं लिंगद्वादशसंभवं ॥ १० ॥ इति द्वात्रिंशात्मकं मंडलं ॥ ॥ लिंगतो

५ ये द्वि नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उशांकं यस्मिन्जायते मंडले कृते ॥ तदहं संप्रवक्ष्यामि मंडलं किल्बिषापहं ॥१॥ ति
र्यगूर्ध्वगता रेखाः कार्या एकोनविंशतिः ॥ कोणे दुस्त्रिपदः श्वेतो वल्लीसप्त
पदा स्मृता ॥२॥ शृंखला त्रिपदा प्रोक्ता भद्रं रक्तं चतुःष्पदं ॥ भद्रपार्श्वे महेशा
नं प्रकुर्याद्दिशभिः पदैः ॥३॥ वल्लीभद्रं शिवानां च मध्ये वेदं त्रिपादकं ॥ शिवासं
च पदा वापी श्वेत धान्यं प्रपूरिता ॥४॥ वापीपार्श्वे महारुद्रं मध्य वाप्याष्टको
ष्ठकाः ॥ पार्श्वे पार्श्वे भवत्येवं महारुद्रं चतुष्टयं ॥५॥ रुद्रस्कंधे चतुःपार्श्वे रक्ता
न्द्वादशाकोष्ठकान् ॥ कारयेद्रक्तधान्येन वर्णकेनाथ वास्तुभान् ॥६॥ पश्चाद्
परिधिः पीतिः षट्चसप्ततिकोष्ठके ॥ कारयेत्सर्वतोभद्रं मध्ये षोडशालिंगके ॥७॥

८

इति षोडशसोमस्वंहरि मंडलं ॥ त्रयस्त्रिंशातिरेखासु तिर्यगूर्ध्वगतोस्तथा ॥
कोणे दुस्त्रिपदः प्रोक्तो वल्लीसप्तपदास्तथा ॥१॥ त्रिपदा शृंखला शीर्षे सितमे
कंपदं भवेत् ॥ एवं सर्वेषु कोणेषु सितं पदचतुष्टयं ॥२॥ वल्लीपार्श्वे वल्याकारं भ
द्रस्याद्रक्तषट्पदं ॥ भद्रपार्श्वे महारुद्रं षड्विंशतिपदं ततः ॥३॥ अष्टादशापदा
वापीवापीपार्श्वे तथा शिवं ॥ शिवं पार्श्वे तथा वापी वापीपार्श्वे तथा शिवं ॥४॥ एवं
कृते चतुःपार्श्वे तु द्वादशाकं भवेत् ॥ समस्तरुद्रस्कंधेषु शातं च द्वादशाधिकं ॥
॥५॥ पीतान्कोष्ठान्प्रकुर्वीत चतुःपार्श्वे प्रयत्नतः ॥ मध्ये तु सर्वतोभद्रं मंडले
पापनाशनं ॥६॥ द्वादशालिंगो भवं चैतत्त्रयस्त्रिंशतिरेखकं ॥ इति प्रकारांत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेणद्वादशांलिंगोभ्दवं॥१२॥ ॥पुनः प्रकारांतरेण॥प्रागुदीच्यागतारेखाः ष
ड्विंशद्विकल्पयेत्॥१॥पदानिवादशाशातंपंचविंशातिरेखया॥ स्वंडेंदुस्त्रिपदःको
णेश्रृंखलाः षट्पदैः स्मृताः॥त्रयोदशपदावल्लीभद्रंतुनवभिःपदैः॥त्रयोद
शपदावापीलिंगमष्टादशैः स्मृतं॥२॥ लिंगत्रयस्यपंक्तस्यैकाकोष्ठाः सप्तद
शैवतु॥पूजापंक्तिस्तुविज्ञेयापरितः परिकल्पिताः॥पूजापक्तंपतरापंक्तौको
ष्ठाद्वात्रींतिसंख्यया॥४॥परिधिः स्वविज्ञेयोमंडलरंनराह्वयोः॥परिध्यंत
रकोष्टेषुसर्वतोभद्रमादिशेत्॥५॥विशेषश्चास्यविज्ञेयश्चश्रृंखलाषट्पदाभ
वेत्॥त्रयोदशापदावल्लीभद्रंतुनवभिःपदैः॥पंचविंशतिपदावापीपरिधिः

२१

षोडशात्मकः॥मध्येनवपदंपद्मंकर्णिकाकेशरान्वितं॥सत्वंरजस्तमोवर्णाःप
रितोमंडलस्यतु॥त्रयःपरिधयःकार्यास्तत्रद्वाराणिकारयेत्॥सितेंदुःश्रृंखं
लोकृष्णावल्लीनीलाप्रकीर्तिता॥भद्रंवैवारुणंज्ञेयंवापीस्याच्छ्वेतवर्णिका॥
॥८॥लिंगानिकृष्णवर्णानिपार्श्वेतोद्वादशैवतु॥परिधिःपीतवर्णश्चस्यात्कम
लंपंचवर्णकं॥१०॥वामपार्श्वे॥शेषः कृष्णतनुःश्वेतोवृश्चले पूर्वापभत्॥ग
धपक्षकृशोदीर्घोवास्तोर्दक्षिणपार्श्वगः॥११॥तदुत्तरेवायव्यपश्चिमांतरैकप
देवामणिबंधे॥पापयक्ष्माधूम्रवर्णोगदावरदमुद्रिकः॥कपोतवाहनोयाम्यम
णिबंधसमाश्रितः॥१२॥तदुत्तरेवायव्यकोणेकपदेवामकबाहौ॥रोगं पाशकरोर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्तो विरालाख्याधिसंग्रहः। इुः कर्मामर्द्दनोवास्तोर्दक्षदोर्दंडसंस्थितः॥३९॥ त
स्यागैकपदेवामबाहौ। अहिराजोज्वकः शुभ्रोफणामणिविराजितः॥ अस्य
कुडीधरोवास्तुर्दक्षकुर्परसंस्थितः॥३८॥ तदुत्तरेबहिः परिधौ द्विपदेपंचदेवताः
।तस्यागपदद्वयेवामकुर्परे। मुख्यो गौरोविश्वकर्माकुंभाक्षसूत्रधृक्॥ निपुण
स्तुलुलायस्थोवास्तु याम्यमुजोश्रितः॥४०॥ तस्यागपदद्वयेवामबाहौ। भ
ल्लाटस्थंद्रसंकाशोवरमुद्रागदाधरः। हयपुत्रोवास्तुपुंसोदक्षदोर्मूलदेशगः॥
॥४१॥ तस्याकुपदद्वयेवामबाहौ॥ सोमोनरविमानस्थोवरहस्तोगदाधरः॥
गौरोमहोदरः श्रीमान्वास्तुर्दक्षांसंस्थितः॥४२॥ तस्याकुपदद्वयेवामांसेकुं

१०

भमालाधरोद्वाभ्यांचतुर्बाहुफणामणिः॥ सर्पोरक्तभ्रमोवास्तोर्दक्षोरुस्थल
मास्थितः॥४३॥ तस्याकुपदद्वयेवामश्रोत्रे। सूत्रवज्रांकुशाभीतिबिभ्राणा
रत्नभूषिता॥ अदितिश्चारुगौरांगीवास्तोर्यम्यिश्रुतिस्थिता॥४४॥ तस्याकु
ईशान्योत्तरभागैकपदेवामनेत्रे। दितिस्तुभूयामलामालाधरणीशूलमालि
नी॥ वृषपत्रावास्तुपुंसोदक्षलोचनसंस्थिता॥४५॥ ततोमंडलाद्बहिः॥ काम
रूपाश्चराक्षस्यः करालाः श्रोत्रभूषणाः॥ रूपाण्पात्रबिभ्राणामांसरक्ता
सवप्रियाः॥ गणपस्याष्टकं। ईशानकोणे। गणपतिं। दुर्गां। क्षेत्राधिपतिं। दक्षि
णे। अंतरिक्षं। अश्विनौ। बिभत्सं। ज्वलं। उत्तरे। पोल्कसं। ईशान्ये। चरकीं। आग्ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं॥विद्दारीं॥नैर्ऋत्सां॥पूतनां॥वायवे॥पापराक्षसीं॥पूर्वादिचतुर्दिक्षुस्वताद्य॥
उग्रसेनं॥स्कंदं॥२॥डामरं॥अर्यमणं॥२॥महाकालं॥जंभकं॥२॥पिलिप्पिलं२
॥५॥ततोइंद्राघष्टौलोकपालान्॥इत्येवंविधायपूजांकुर्यात्॥७॥ ॥७॥

३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=17.09.19 11:11
,TRANSFERRED=2019/09/17 at 11:17:12
,PAGES=13
,TYPE=STD
,NAME=S0001867
,Book Name=M-650-LINGTOBHADRA SARVTOBHADRA KARIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection